श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीशङ्कराचार्य विरचितम्

# ॥ श्रीरामपञ्चरत्नम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामपञ्चरत्नम् ॥

कञ्जातपत्रायत लोचनाय
कर्णावतंसोज्ज्वल कुण्डलाय।
कारुण्यपात्राय सुवंशजाय
नमोऽस्तु रामाय सलक्ष्मणाय॥ 1 ॥

विद्युन्निभाम्भोद सुविग्रहाय
विद्याधरैस्संस्तुत सद्गुणाय।
वीरावताराय विरोधिहर्त्रे
नमोऽस्तु रामाय सलक्ष्मणाय॥ 2 ॥

संसक्त दिव्यायुध कार्मुकाय
समुद्र गर्वापहरायुधाय।
सुग्रीवमित्राय सुरारिहन्त्रे
नमोऽस्तु रामाय सलक्ष्मणाय॥ 3 ॥

पीताम्बरालङ्कृत मध्यकाय
पितामहेन्द्रामर वन्दिताय।
पित्रे स्वभक्तस्य जनस्य मात्रे
नमोऽस्तु रामाय सलक्ष्मणाय॥ 4 ॥

नमो नमस्तेऽखिल पूजिताय
नमो नमस्तेन्दुनिभाननाय।
नमो नमस्ते रघुवंशजाय
नमोऽस्तु रामाय सलक्ष्मणाय॥ 5 ॥

**इमानि पञ्चरत्नानि**
**त्रिसन्ध्यं यः पठेन्नरः।**
**सर्वपाप विनिर्मुक्तः**
**स याति परमां गतिम्॥ 6॥**

॥ इति श्रीरामपञ्चरत्नं समाप्तम्॥